श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तमः सर्गः ॥

## रावणेन्द्रजित्पराक्रमं वर्णयित्वा राक्षसैर्भवान् रामं विजेष्यतीति रावणाय विश्वासदापनम्

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः।
ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम्॥ 6.7.1 ॥

द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः।
राजन् परिघशक्त्यृष्टिशूलपट्टिशकुन्तलम्॥ 6.7.2 ॥

सुमहन्नो बलं कस्माद् विषादं भजते भवान्।
त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि॥ 6.7.3 ॥

कैलासशिखरावासी यक्षैर्बहुभिरावृतः।
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः॥ 6.7.4 ॥

स महेश्वरसख्येन श्लाघमानस्त्वया विभो।
निर्जितः समरे रोषाल्लोकपालो महाबलः॥ 6.7.5 ॥

विनिपात्य च यक्षौघान् विक्षोभ्य विनिगृह्य च।
त्वया कैलासशिखराद् विमानमिदमाहृतम्॥ 6.7.6 ॥

मयेन दानवेन्द्रेण त्वद्भयात् सख्यमिच्छता।
दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव॥ 6.7.7 ॥

दानवेन्द्रो महाबाहो वीर्योत्सिक्तो दुरासदः।
विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः॥ **6.7.8**॥

निर्जितास्ते महाबाहो नागा गत्वा रसातलम्।
वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः॥ **6.7.9**॥

अक्षया बलवन्तश्च शूरा लब्धवराः पुनः।
त्वया संवत्सरं युद्ध्वा समरे दानवा विभो॥ **6.7.10**॥

स्वबलं समुपाश्रित्य नीता वशमरिन्दम।
मायाश्चाधिगतास्तत्र बह्व्यो वै राक्षसाधिप॥ **6.7.11**॥

शूराश्च बलवन्तश्च वरुणस्य सुता रणे।
निर्जितास्ते महाभाग चतुर्विधबलानुगाः॥ **6.7.12**॥

मृत्युदण्डमहाग्राहं शाल्मलीद्रुममण्डितम्।
कालपाशमहावीचिं यमकिङ्करपन्नगम्॥ **6.7.13**॥

महाज्वरेण दुर्धर्षं यमलोकमहार्णवम्।
अवगाह्य त्वया राजन् यमस्य बलसागरम्॥ **6.7.14**॥

जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः।
सुयुद्धेन च ते सर्वे लोकास्तत्र सुतोषिताः॥ **6.7.15**॥

क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः।
आसीद् वसुमती पूर्णा महद्भिरिव पादपैः॥ **6.7.16**॥

तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे।
प्रसह्य ते त्वया राजन् हताः समरदुर्जयाः॥ **6.7.17**॥

तिष्ठ वा किं महाराज श्रमेण तव वानरान्।
अयमेको महाबाहुरिन्द्रजित् क्षपयिष्यति॥ **6.7.18**॥

अनेन च महाराज माहेश्वरमनुत्तमम्।
इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः॥ **6.7.19** ॥

शक्तितोमरमीनं च विनिकीर्णान्त्रशैवलम्।
गजकच्छपसम्बाधमश्वमण्डूकसङ्कुलम्॥ **6.7.20** ॥

रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम्।
रथाश्वगजतोयौघं पदातिपुलिनं महत्॥ **6.7.21** ॥

अनेन हि समासाद्य देवानां बलसागरम्।
गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः॥ **6.7.22** ॥

पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा।
गतस्त्रिविष्टपं राजन् सर्वदेवनमस्कृतः॥ **6.7.23** ॥

तमेव त्वं महाराज विसृजेन्द्रजितं सुतम्।
यावद् वानरसेनां तां सरामां नयति क्षयम्॥ **6.7.24** ॥

राजन्नापदयुक्तेयमागता प्राकृताज्जनात्।
हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम्॥ **6.7.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः॥